International Journal of Sanskrit Research 2020; 6(2): 74-77

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2020; 6(2): 74-77
© 2020 IJSR
www.anantaajournal.com
Received: 04-01-2020
Accepted: 06-02-2020

**Pankaj Kumar Mahana**
Research Scholar, Dept.of Sanskrit, North Orissa University, 2nd Campus Keonjhar, Odisha, India

**Corresponding Author:**
**Pankaj Kumar Mahana**
Research Scholar, Dept.of Sanskrit, North Orissa University, 2nd Campus Keonjhar, Odisha, India

# उत्कलवङ्गयो: विद्यमानानाम् शक्तिपीठानां परिचय:

**Pankaj Kumar Mahana**

भारतदेश: देवभूमिरूण समग्रधरातले विराजते स्म । हिमालयत: कुमारिकां यावत् अनेकानि तीर्थपीठानि सन्ति । यथा-

हिमालयात् समारभ्य यावत् इन्दु: सरोवरम् ।
तं देवनिर्मितं देश हिन्दुस्थानं प्रचक्षते ।। (बृहस्पति आगम)

अस्माकं राष्ट्रे अनेकानि शक्तिपीठानि सन्ति ।यतोहि शक्ति एव उत्पत्ते: स्वरूपिणी भवति । शक्तिं विना अस्य जगत: उत्पत्ति: नैव संम्भवति । अत: शक्तिपीठानाम् वैशिष्ट्यम् अस्ति । अत: भारते सर्वत्र शक्तिपीठानि वर्तन्ते ।तेषु शक्तिपीठेषु दक्षप्रजापते: पुत्री या आसीत् सती तस्या: शरीरस्य विभिन्न-स्थानस्य वस्त्रेण सहितं अङ्गानि शरीरस्य अस्थीनि च यत्र यत्र पतितानि तत्र तत्र शक्तिपीठानि समुद्भूतानि । अत्र मया शीर्षके अस्मिन् उत्कलवङ्गयो: द्वयो: प्रान्तयो: मध्ये कानि कानि शक्तिपीठानि सन्ति तथा च तेषां शक्तिपीठानाम् किं माहात्म्यं अस्ति तत् सर्वं अपि अत्र प्रस्तूयते ।

अत: जना: अमुं मन्त्रम् उच्चारणं कुर्वन्ति ।यथा-
"सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधिके ।
शरण्यै त्र्म्बक: गौरि नारायणि नमोस्तुते ।।"१

**उत्कले शक्तिपीठं:--**

शक्तिपीठस्य स्थानानुसारेण भेदद्वयं दृश्यते । प्रथमत:जगन्नाथ:मन्दिरस्य प्राङ्णे स्थितम् विमला देवीशक्तिपीठम् ।यत्र देव्या: नाभि पतिता । यथा विरजाक्षेत्रयस्य उपत्ति । यथा-

"विरजा चोत्कले ख्याता नाभिर्मे जयभैरव:।। "२

अर्थत् यत्र शक्ति "विमला" तथा "जगन्नाथ:" भैरवं रूपेण अवस्थापितम् ।यथा-

"गङ्गायां मंङ्गला नाम विमला पुरूषोत्तमे "३

पुनश्च देवीभागवते वर्णितम् यत्-

"गयायां मङ्गला प्रोक्ता विमला पुरुषोत्तमे ।"४

द्वितीयत:मन्यतानुसारेण उत्कलप्रदेशस्य याजपुरं इति नगरे ब्रह्मकुण्डस्य समीपे स्थिता शक्तिपीठम् 'विरजादेवी'शक्तिपीठर- पेण परिचितम् अस्ति । अत:विद्वानजना:इदं स्थानं "नाभिपीठम् " इति मन्यन्ते ।तत्र किम्बदन्ती अनुसारेण व्रह्मा तत्र यज्ञ: कृतम् आसीत् तस्मात् यज्ञकुण्डे स्वयं देवीविराजिता अभवत् ।
देव्या:"नाभि " अस्मिन् उत्कले पतितम् ।अत:समग्र उत्कल देश: *'नाभिक्षेत्र'*अथवा *"विरजा"*क्षेत्रम् रुपेण परिचितम् अस्ति ।एतस्य शक्तिपीठस्य शक्ति "विमला" "भैरव:"जगन्नाथ: नाम्ना विश्वविख्यात : ।
तेषु कथ्यते -

"उत्कले नाभिदेशस्तु विरजाक्षेत्रमुच्यते ।
विमला सा महादेवी जगन्नाथस्तु भैरव:।।"५

उत्कल:न केवलं एक:ग्राम: अथवा नगरं अपितु अयं उत्कल:प्रदेश: एकं राज्यमं अथवा देशस्य नाम भवति ।
यथा-

"वर्षाणां भारतं श्रेष्ठं देशानामुत्कल:स्मृत:।
उत्कलेन समो देशो देशो नास्ति महीतले ।।६

अयं "विरजा "शव्द:क्षेत्रशव्दस्य विशेषणं भवति - विगतानि रजांसि यस्य तत्"- अर्थत् अयं उत्कलदेश: 'मलविमुक्तं' क्षेत्र भवति। यत्र महादेवी "विमला " समग्र उत्कलस्य आराध्य देवी।
पुनश्च चतुर्षुदिक्षु: चत्वारि पीठानि उल्लेखितानि सन्ति । तत्र औड्र नामकं पीठम् प्रथमपीठरूण वर्णितम् अस्ति ।यथा-

"ओड्राख्यं प्रथमं पीठं द्वितीय जालशैलकम् ।
तृतीयं पूर्णपीठं तु कामरूपं चतुर्थकम् ।।
औड्रपीठं पश्चिमे तु तथैवोड्रेश्वरी शिवाम् ।
कात्यायनीं जगन्नाथमोड्रेशं च प्रपूजयेत् ।।७

जगन्नाथपूर्यां विरजमान: पुरूषोत्तम: जगन्नाथ: भवति। श्रीजगन्नाथमन्दिरस्य प्राङ्गणे विराजमाना "विमला" तन्त्रोक्त विमला भवति ।
यथा-

"उत्कले नाभिदेशञ्च् च विरजाक्षेत्रमुच्यते ।
विमला सा महादेवी जगन्नाथस्तु भैरव:।।"८

पुनश्च ब्रह्मपुराणमतानुसारेण उत्कलस्य याजपुरे विरजादेवी विराजमाना भवति ।
यथा-

"विरजे विरजा माता ब्रह्माणी सम्प्रतिष्ठिता ।
यस्या:संदर्शनान्मर्त्य:पुनात्यासप्तमं कुलम् ।।९

पुनश्च महाभारते पाण्डवानां वनवाससमये विरजा क्षेत्रस्य उल्लेख्यं अस्ति। अत:याजपुरे स्थितं विरजापीठं उत्कलस्य अधीश्वरी देवी भवति।

**उत्कलशक्तिपीठस्यस्थानं निदर्शनम्** -
उत्कलप्रदेशस्य हाबडारेल्बे पार्शे वैतरणीमार्गस्स स्थाने १९कि०मि० दूरे याजपुरं नगरं अवस्थितम् ।

**शक्तिपीठस्य महत्वं** -

अयं एतस्य शक्तिपीठस्य सामाजिक महत्वं अतीव गैरवमयं अस्ति ।

याजपुरं "नाभिगया" रूपेण परिचितम् अस्ति । अत्र जना:श्राद्ध:तर्पण इत्यादिषु कार्येषु अत्र निमन्ते अत्र आगमिष्यन्ति ।

**वङ्गक्षेत्रे विद्यमानम् शक्तिपीठानाम् परिचय**:----

१. **किराट शक्तिपीठम्**

स्थान:--पश्चिमवङ्गस्य हुगुली नदी समीपे स्थित्वा लाल् वाग् कोट नामकस्थाने किराटशक्तिपीठम् अस्ति ।

कीरिट: निपतितम् ।

शक्ति-विमला,भूवनेश्वरी

भैरव-सम्वद्ध

२. **अट्टहास पीठम्**

स्थान:- प०व०लावपुर

निपतितम्-अधिष्ट

शक्ति- प्रफुलरा

भैरव:-विश्ववेस्

३. **नन्दीपुरम्**

प०व० संन्ध्या

पतितम्- कण्ठस्य हार

शक्ति -माता निन्दिनि

भैरव-नन्दिकेश्वर:

४. **नलहटी**

प०व० वल् पुर

निपतितम्-उदरनली

शक्ति-कालिका

भैरव-योगेश

५. **वक्रतेश्वर शक्तिपीठ**

प०व० संन्ध्या

पतितम् - मन

शक्ति- महिषामद्धिनी

भैरव- वक्रतानाथ:

६. **वहुला**

स्थान:-प०व० कोटब्वा जंकसन् समीपे केतु ग्राम

निपतितम् -वाम वाहु

शक्ति -वाहुला

भैरव-भीरूक्

७. **त्रिस्तोता**

प०व०जलपाई ग्रामस्य त्रिस्ता नदी समीपे

निपतितम् -वामपाद

शक्ति-भ्रामरी

भैरव:-भीरुक्

८. **विभास**

प०व० मेदिनी पुर जिल्ला तामृलुक् ग्रामे

निपतितम् -टखना

शक्ति -कपालीनि

भैरव:-सर्वानन्द:

९. **युगद्याशक्तिपीठ**:

प०व० वोद्धमान जिल्ला

सिर् ग्राम

निपतितम-

दक्षिणचरणस्य आङ्गुलियकम्

शक्ति- युगाडिया

भैरव:-छिरखण्डक

१०. **कालिघाट**

स्थान:प०व० कालिघाट:

निपतितम् - वामपादस्य अङ्गुलियम् चत्वार

शक्त- कालिका

भैरव:- नकुलेश:

एवं च उत्कलक्षेत्रे वङ्गक्षेत्रेतु आहत्य प्राय: एकादश शक्तिपीठानि वर्तन्ते। तेषु शक्तिपीठेषु माता पार्वती एव एकं अवतार रुपेण भक्तानां दु:खं दुरीं करोति ।

सा च शक्ति स्वरूपीणी पार्वती विविधशक्ति नाम्ना परिचिता अस्ति ।तस्या:शक्ति वैशिष्ठं महत्वं च तन्त्रशास्त्रेषु निरूपिता: सन्ति । सा च शक्ति : सर्वसमर्थरूपा जगतां कल्याणाय आर्विभूता इति ज्ञायते ।

**पादटीप्पणी**:

१. दुर्गासप्तशती सप्तश्लोकिदुर्गा, श्लो०३
२. Manuscript G and Annadamangala.
३. मत्य०पु-१३/३५
४. देवी०भा.-७/३०/६४
५. तन्त्रचुडामणि, पीठनिर्णय, श्लो० -१३
६. कपिल०पु-१/९
७. कालिका ०पु-६४/४३-४४
८. तन्त्रचुडामणि, पीठनिर्णय श्लो.-१३
९. ब्रह्म ०पु०-४२/१

**सहायकग्रन्थौ**--

१. दुर्गासप्तशती गीताप्रेस,गोरखपुर-२७३००५
२. M.S-Manuscript G and Annadamangala.
३. देवीभागवत: गीताप्रेस, गोरखपुर
४. कपिलपुराण, गीताप्रेस, गोरखपुर
५. उत्कल पूजा पद्धति: